vyómaa
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

रामकथा

चित्तूरुसभायाः परिचयपरीक्षार्थं निर्दिष्टा

पाठः ५ (श्लोकाः ३०-३७)

पुनरावर्तनम्

- बालकाण्डम्
  - रावणस्य कथा, रामजननम्
  - ताटकादीनां हननम्, यज्ञसंरक्षणम्, अहल्याशापमोक्षः
  - शिवधनुषः भङ्गः, सीताविवाहः, परशुरामस्य गर्वभङ्गः
- अयोध्याकाण्डम्
  - रामस्य वनगमनम्
  - दशरथस्य मरणम्
  - भरतस्य प्रार्थना, पादुकाप्रदानम्

ततः स गच्छन् काकुत्स्थः समागम्य जटायुषम् ।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥३०॥

- ततः, सः, गच्छन्, काकुत्स्थः, समागम्य, जटायुषम्
  वैदेह्याः, पालनाय, एनम्, श्रद्दधे, पितृ-वल्लभम्

ततः स गच्छन् काकुत्स्थः समागम्य जटायुषम् ।
वैदेह्याः पालनायैनं श्रद्दधे पितृवल्लभम् ॥३०॥

- ततः, गच्छन् सः काकुत्स्थः जटायुषं समागम्य, वैदेह्याः पालनाय एनं पितृवल्लभं श्रद्दधे ।

तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाभिका।
तन्निरस्ता लक्ष्मणं सा वव्रे सोऽपि निराकरोत् ॥३१॥

- तत्र, अभ्येत्य, एकदा, रामम्, वव्रे, शूर्पणखा, अभिका
  तत्-निरस्ता, लक्ष्मणम्, सा, वव्रे, सः, अपि, निराकरोत्

तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाभिका।
तन्निरस्ता लक्ष्मणं सा वव्रे सोऽपि निराकरोत् ॥३१॥

- तत्र एकदा अभिका शूर्पणखा अभ्येत्य रामं वव्रे । तन्निरस्ता सा लक्ष्मणं वव्रे । सः अपि [तां] निराकरोत् ।

राममेव ततो वव्रे कामार्ता कामसन्निभम् ।
पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥३२॥

- रामम्, एव, ततः, वव्रे, काम-आर्ता, काम-सन्निभम्
- पुनः, च, धिक्कृता, तेन, सीताम्, अभ्यद्रवत्, रुषा

राममेव ततो वव्रे कामार्ता कामसन्निभम् ।
पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥३२॥

- ततः, कामार्ता [सा] कामसन्निभं रामम् एव वव्रे । पुनः च तेन धिक्कृता [सा], सीतां रुषा अभ्यद्रवत् ।

लक्ष्मणेन तदा रोषात् कृत्तश्रवणनासिका ।
सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥३३॥

- लक्ष्मणेन, तदा, रोषात्, कृत्त-श्रवण-नासिका

  सा, तु, गत्वा, जनस्थानम्, खराय, एतत्, न्यवेदयत्

लक्ष्मणेन तदा रोषात् कृत्तश्रवणनासिका ।
सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥३३॥

- तदा लक्ष्मणेन रोषात् कृत्तश्रवणनासिका सा तु जनस्थानं गत्वा, खराय एतत् न्यवेदयत् ।

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।
खरं सहानुगं सङ्ख्ये जघान लघुविक्रमः ॥३४॥

- तत्-क्षणम्, लक्ष्मणे, सीताम्, निधाय, रघु-नन्दनः
  खरम्, सह-अनुगम्, सङ्ख्ये, जघान, लघु-विक्रमः

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।
खरं सहानुगं सङ्ख्ये जघान लघुविक्रमः ॥३४॥

- तत्क्षणं, सीतां लक्ष्मणे निधाय, लघुविक्रमः रघुनन्दनः सङ्ख्ये खरं सहानुगं जघान ।

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।
न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥३५॥

- ततः, शूर्पणखा, गत्वा, लङ्काम्, शोक-समन्विता
  न्यवेदयत्, रावणाय, वृत्तान्तम्, सर्वम्, आदितः

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।
न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥३५॥

- ततः, लङ्कां गत्वा, शोकसमन्विता शूर्पणखा रावणाय सर्वं वृत्तान्तं आदितः न्यवेदयत् ।

सोऽप्यन्तरं समासाद्य रावणो यतिरूपधृत्।
सीतां गृहीत्वा प्रययौ गगनेन मुदान्वितः ॥३६॥

- सः, अपि, अन्तरम्, समासाद्य, रावणः, यति-रूप-धृत्
  सीताम्, गृहीत्वा, प्रययौ, गगनेन, मुदा, अन्वितः

सोऽप्यन्तरं समासाद्य रावणो यतिरूपधृत्।
सीतां गृहीत्वा प्रययौ गगनेन मुदान्वितः ॥३६॥

- सः रावणः अपि अन्तरं समासाद्य, यतिरूपधृत् [सन्] सीतां गृहीत्वा मुदान्वितः गगनेन प्रययौ।

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।
रावणो रक्षितुं सीतां न्ययुङ्क्त च निशाचरीः ॥३७॥

- अशोक-वनिका-मध्ये, संस्थाप्य, जनक-आत्मजाम्
  रावणः, रक्षितुम्, सीताम्, न्ययुङ्क्त, च, निशा-चरीः

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।
रावणो रक्षितुं सीतां न्ययुङ्क्त च निशाचरीः ॥३७॥

- रावणः अशोकवनिकामध्ये जनकात्मजां संस्थाप्य, सीतां रक्षितुं च निशाचरीः न्ययुङ्क्त ।

सङ्क्षेपः

- वने जटायुषा मेलनम्
- शूर्पणखाप्रसङ्गः
- खरादीनां संहारः
- रावणेन सीतापहरणम्

vyoma

॥ वाचं धेनुमुपासीत ॥

Saṃskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.